## नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च । (१६/५८३)

[1]नमः स्वस्ति स्वाहा स्वधा अलम् वषट् इत्येतैर्योगे चतुर्थी विभक्तिर्भवति । नमो देवेभ्यः (मै. १. २. १३) । स्वस्ति प्रजाभ्यः । स्वाहा अग्नये (तै. १.८.१३.१) । स्वधा पितृभ्यः (मै. १.२.१३) । अलं मल्लो मल्लाय (म.भा. १.४५०) । अलमिति पर्याप्त्यर्थग्रहणम् (म. भा. १.४५०) । [2] प्रभुर्मल्लो मल्लाय । [3]शक्तो मल्लो मल्लाय (म. भा. १.४५०) । वषडग्नये । [4]वषडिन्द्राय (ऋ. ७.९७.७) । चकारः [5]पुनरस्यैव समुच्चयार्थः । तेना[6]शीर्विवक्षायामपि षष्ठीं बाधित्वा [7]चतुर्थ्येव भवति । स्वस्ति [8]गोभ्यो भूयात् । [9]स्वस्ति ब्राह्मणेभ्यः[10] (म. भा. १. ४५०) ॥

## मन्यकर्मण्यनादरे विभाषाऽप्राणिषु । (१७/५८४)

[11]मन्यतेः कर्मणि मन्यकर्मणि । मन्यकर्मणि [12]प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भवति अनादरे गम्यमाने । अनादरस्तिरस्कारः । न [13]त्वा तृणं मन्ये, न त्वा तृणाय मन्ये । न त्वा बुसं मन्ये, न त्वा बुसाय मन्ये । [14]मन्यतिग्रहणं किम् ? न त्वा तृणं चिन्तयामि । विकरणनिर्देशः किमर्थः ? न त्वा तृणं मन्वे[15] । अनादरे इति किम् ?

अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलम् ।
अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति ॥

अप्राणिषु इति किम् ? न त्वा [16]शृगालं मन्ये ।

[१२४] यदेतदप्राणिष्विति तदनावादिष्विति [17]वक्तव्यम् । (म. भा. १. ४५०)

व्यवस्थितविभाषा [18]च ज्ञेया । न त्वा नावं मन्ये यावदुत्तीर्णं न नाव्यम् । न त्वाऽन्नं मन्ये यावन्न भुक्तं श्राद्धम् । प्राणिषु तूभयम् । न त्वा काकं मन्ये (म. भा. १. ४५०) । न त्वा शृगालं मन्ये । [19]इह चतुर्थी द्वितीया च भवतः – न त्वा श्वानं मन्ये, न त्वा शुने मन्ये (म. भा. १. ४५०) । युष्मदः कस्मान्न भवति चतुर्थी, एतदपि हि मन्यतेः कर्म ? व्यवस्थितविभाषाविज्ञानादेव न [20]भवति ॥

---

1. नम इत्यादिभिर्योगे ग. 2. तेन इत्यधिकम् ग, उदाहरणमिदं नास्ति फ. 3–4. उदाहरणे इमे न स्तः ग. 5. पुनरसौ इ. 6. आशीर्विषये ह. 7. चतुर्थी विभक्तिः ह. 8. गोब्राह्मणेभ्यो ह. 9. उदाहरणमिदं नास्ति ग. 10. भूयात् । उपपदविभक्तेः कारकविभक्तिर्बलीयसी । तेन नमस्करोति देवान् इति द्वितीया एव भवति इत्यधिकम् क. ड. 11. मन्यतेः कर्म मन्यकर्म तस्मिन् ड. इ. 12. प्राणिगणवर्जिते क. 13. त्वां ड. 14. मन्यतेर्ग्रहणं ड. 15. मनुमहे, मनुर्बोधने, तनोतेरुः इत्यधिकम् क, मनु बोधने इत्यधिकम् इ, मनु अवबोधने इत्यधिकम् ड. 16. सृकालं ग. 17. वचनमेतत् ह. 18. विज्ञेया क. ड. इ. ह, चेयं विज्ञेया फ. ग, अवज्ञेया ब. 19. न हि चतुर्थी भवति इ, इह हि चतुर्थी भवति क. ड. ह. 20. भविष्यति इ.